CC-0. Digitized by eGangotri and MIDF- Delhi



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वक
१

श्रीगणेशाय नमः ॥ अथ कवचम् ॥ श्रीमहोग्रतारा उवाच ॥ राज्ञां मण्डलि
कादिनां मण्डलोपरि सर्पिणाम् ॥ सगर्वाणां महादेवधनैर्विकृत
चेतसाम् ॥ १ ॥ गजः सर्पादिजन्तूनां भंजनं वदशंकरः ॥ श्रीभैरव उवा
चः ॥ पुराकृतयुगे देवी वातः क्षोभमुपस्थितम् ॥ २ ॥ सप्तार्णवानामे
कत्वं गमे क्षोभं ययुः सुराः ॥ सेन्द्रास्मविस्मयासर्वे सुभयासमुप
स्थिता ॥ ३ ॥ देवा ऊचुः ॥ शिवशंकररुद्रत्वं रक्षास्मान् सरणागतान् ॥ त
च्छ्रुत्वाहं सुरेशानी कवचं पूर्वनिर्मितम् ॥ ४ ॥ दत्तवान्सर्वदेवेभ्यो

रामः
१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

महाभयनीकृन्तनम् ॥ कवचं वगलामुख्या शिवप्राणप्रदं महत् ॥५॥
पूर्वं भ[illegible] सुरत्रासाद्भयं विद्रावितेस्वयम् ॥ पठनात्तव मत्प्राणं रक्षि
तापरमेश्वरी ॥६॥ शिवप्राणप्रदं तस्माद्विश्रुतं रक्षकं परम् ॥ ष
ट्त्रिंशदक्षरी वामे वगला परमा सिर ॥७॥ सहस्राणो गुरुः पातु स
शक्त्या परमोज्वला ॥ चिदुपा परमा शक्तिर्ललाटं शिवगेहिनी ॥
८॥ भ्रुयुगं मे महाकाली नेत्रयुग्मं परेश्वरी ॥ कर्णयुग्मं पीतपु
ष्पं प्रिया मे व्यात्कपोलयोः ॥९॥ चिबुके परमा शक्तिरोष्ठयोः परमा क

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वतिवात्सल्यावंध्यापुत्रवती भवेत्॥२०॥ कृत्रिमेषु च सर्वेषु नानाभयसमुद्भवे
॥त्रिसप्तमं त्रितं तोयं सद्यो निर्माल्यता भवेत्॥२१॥ नित्यमष्टोत्तरशतं व
गलाहृदयं मनुम्॥ चिन्तितं च भवेच्च भवेत्पुत्र नात्र कार्या विचारणा॥२२॥ ई
ति श्री एकविरातंत्रे श्री भैरवोग्रतारासंवादे श्रीवगलादेव्याकवचं समा
प्तं संपूर्णशुभम्॥ रामः॥ श्रीगणेशाय नमः॥ अथ वगलायाष्टोत्तरश
तनामानि॥ श्रीपार्वत्युवाच॥ देवदेव महादेव सृष्टिस्थित्यन्तकारकः॥
त्वमेको निष्कलो देवः सर्वेषां हृदयानुगः॥ किं त्वया जप्यते नाथ किं त्व

शत
॥३॥
हा
रामः
॥३॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीगणेशाय नमः ॥ अथ सहस्रनामानि ॥ ॐ सुरालयः प्रधाने तु देवदेवं महेश्वरम् ॥ शै
लाधिराजतनयासंजेहरमुवाच ह ॥ १ ॥ देव्युवाच ॥ परमेश परं धाम पुरुषेश्व
रवल्लभः ॥ नाम्नां सहस्रं वगलामुख्याकथय वल्लभः ॥ २ ॥ श्रीशिव उवाच ॥
शृणु देवि प्रवक्ष्यामि नाम्नां देव्या सहस्रकम् ॥ परं ब्रह्मास्त्रदेव्यायां चतुर्व
र्गफलप्रदां ॥ ३ ॥ गुह्याद्गुह्यतरं देवी सर्वसिद्धैकवर्द्धितम् ॥ अतिगुह्यत
रा विद्या सर्वतंत्रेषु गोपितम् ॥ ४ ॥ वीशेषतः कलियुगे महासिद्धौघदायिनी
॥ गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः ॥ ५ ॥ अप्रकाश्यमीदं सत्यं स्वयोनीरिव
सुव्रते ॥ विरोधी विघ्नसंघानां मोहिनि परयोषिताम् ॥ ६ ॥ स्तंभिनी

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वस्तो
१

राजसैन्यानां वादिनी परवादिनाम् ॥ पुरा चैकार्णवे घोरे काले परमभैरवे
॥७॥ सुन्दरि सहितो देवः केशवक्लेशनासनः ॥ उरगासनमासीनो योग
निद्रामुपागमत् ॥८॥ निद्राकाले चित्कलेशी मया प्रोक्तः सनातनः ॥ म
हास्तंभकरं देवस्तोत्रं वायतनामकम् ॥९॥ सहस्रनामपरमं वद देवस्य
कस्यचित् ॥ श्रीभगवानुवाच ॥ शृणु शंकरदेवेश परमातिरहस्यकम् ॥
१०॥ अजो[illegible]यत्प्रसादेन विष्णुः सर्वेश्वरेश्वरी ॥ गोपनियं प्रयत्नेनेन प्र
हं काशात्सिद्धिहानीकृत् ॥११॥ ॐ अस्य श्रीपीतांबरासहस्रनामस्तोत्रमंत्रस्य

रामः
१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीभगवान्सदाशिव ऋषिः अनुष्टुप्छंदः श्रीजगद्वसिकरी पीतांम्बरा देवता सर्वा
भीष्टसिद्ध्यर्थे जपे विनियोगः ॥ ध्यानम् ॥ पीताम्बरापरोधानां पी
नोन्नतपयोधराम् ॥ जटामुकुटशोभाढ्यां पित्रिभूमिकृतालयाम् ॥ १२ ॥ इ
त्रोर्जिह्वां मुद्गरं च बिभ्रतीं परमां कलाम् ॥ सर्वागमपुराणेषु विख्याता
भुवनत्रये ॥ १३ ॥ सृष्टिस्थितिविनाशानामादिभूतामहेश्वरिम् ॥ गो
प्यं सर्वप्रयत्नेन शृण्वतां कथयामि ते ॥ १४ ॥ जगद्विध्वंसिनीं देवी
मजरामरकारिणीम् ॥ तान्नमामि महामायां महदैश्वर्यदायि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वस्तो २

निं॥१५॥ प्रणवं पूर्वमुद्धृत्य स्थिरमायां ततो वदेत्॥ वगलामुखि सर्वेति
दुष्टानां वाचमेव च॥ मुखं पदं स्तंभयेति जिह्वां किलय बुद्धीमत्॥ वि
नाशयेति तांश्च स्थिरमायां ततो वदेत्॥१७॥ वह्निप्रियान्वितो मंत्रश्च
तुर्वर्गफलप्रदा॥ षट्त्रिंशदक्षरिवीद्या देवानामपि दुर्लभा॥१८॥ ब्र
ह्मास्त्रा ब्रह्मविद्या च ब्रह्मभूता सनातनी॥ ब्रह्मेशि ब्रह्मकमला वगलाब्र
ह्मचारिणी॥१९॥ नित्यानंदा नित्यरूपा नित्यरूपा निरामया॥ संधारि
णी महामाया शंकराक्षयकारिणी॥२०॥ कमला विमला नीला रत्न

रामः २

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नाभिगुणासिताः॥ मङ्गलाविजयाजापासर्वमङ्गलकारिणी॥२१॥ यामिनी
कामिनी काम्या कामाक्षा कामचारिणी॥ कामप्रिया कामरता का
मकामस्वरूपिणी॥२२॥ कामाख्या कामबीजस्था कामपीठनिवा
सिनी॥ कामहा कामकालिच कपालीच करालिका॥२३॥ कंसारिकमला
कालीकैलासेश्वरवल्लभा॥ कात्यायनीकेशवाच करुणा कामकीलयु
क्॥२४॥ क्रियाकीर्तिकर्त्रिका च काशिका मातुराज्ञिवम्॥ कालघ्नीका
लिकातारा कारा ताराध्ववामला॥२५॥ खेचरीचखमूर्तिश्च क्षुद्राक्षु

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सह
३

द्रधरावला॥खड्गहस्ताखरतराखड्गिनीखर्प्परप्रियाः॥२६॥गंगागौरीगामि
नीचगीतागोत्रविवर्द्धिनी॥गोधारागोकरागोप्यागंधर्वपुरवासिनी॥
२७॥गान्धर्विसर्वगाधर्प्यगोपिनीगरुडासना॥गोविन्दाभावगान्धा
रीगान्धारिगंधमादिनी॥२८॥गौरांगीगोपिकामूर्तिगोपगोष्ठनि
वासिनी॥गंधागजेंद्रगमनीगंगाधरप्रियागदा॥२९॥घनाघोराघोररू
पाघनश्रेणीघनप्रभा॥दैत्येन्द्रःप्रबलाघंटनादिनीघोरनिस्वना॥३०
॥डाकिन्युमाडपेंद्राचउर्वशीउरगासनाः॥उत्तमाउन्नताउत्राउत्तर

राम:
३

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्थानवासिनी ॥३१॥ चामुण्डा चण्डिका चण्डिचण्डदर्प्पहरेति च ॥ उग्रचण्ड
चंद्रघंटा चंडदैत्यविनासिनी ॥ चंडरूपा प्रचंडा च चंडा चंडशरीरिणी ॥ चतुर्भु
जा प्रचंडा च चराचरनिवासिनी ॥३३॥ द्वन्द्वप्राय शिरोवाहा दूलाच्छलतरा
च्छली ॥ द्वलरूपा द्वलधरा क्षत्रियाक्षयकारिणी ॥३४॥ जया च जय
दुर्गा च जंपंति जयदा परा ॥ जपिनी जटिनी ज्योत्स्ना जटाधरप्रियाजिता
॥ जितेंद्रियाजितक्रोधा जपमाला जलेश्वरि ॥ जितमृत्युजरातीता जा
ह्नविजनकात्मजा ॥३६॥ झंकारी झर्झरा झंटा झंजा झंकारशोभिनी ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तह
४

ऋ ॠ रा ऋ ऊ रा ऋ रि ऋ रा ऋ र त रा प्रिया ॥३७॥ ञं सा भ्रमेता ञं कारि ञ ना क
ल्याण दायिनी ॥ ञमेत तमसा नित्या ञ युक्ता शंकरः प्रिया ॥३८॥ ठे का ठे
पाठ्य कारि ठामिनी ठमन प्रिया ॥ ठकार धारिणी ठिका ठकारा ठि
क्कर प्रि[illegible]या ॥३९॥ ठक ना शा ठक वति ठामिनी ठमन प्रिया ॥ डरहा ड
किनी डारा डमरा डमर प्रिया ॥४०॥ डगिनी डंड युक्ता च डमरु डंड वहत्र
भा ॥ ढक्का ढक्का ढी क्वनादा ढो लशब्द प्रबोधिनी ॥४१॥ ढामिनी ढमनः प्रीता ढग
तंत्र प्रकाशिनी ॥ अनेकरूपिणी आना अणिमा सिद्धि दायिनीः ॥४२॥ आमंत्रिणी
अकारि च आनुमुद्रा नुसंस्तुताः ॥ तारा तंत्र वति ता तंतित्व रूपा तपस्विनी ॥४३॥ तरंगि

राम:
४

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

णितत्वसूरातंत्रिकातंत्रविग्रहा॥तत्वरूपातत्वधात्रितत्वव्रतप्रदक्षिणी॥४४॥तन्त्रयंत्रा[illegible]ज्ञान
परातलातलविनासिनी॥तल्पदाकल्पदाकाम्यास्थिरास्थिरतरस्थितिः॥४५॥स्थाणुप्रिया
स्थानु[illegible]प्रियास्थितास्थानप्रदायिनी॥दिगंम्बरादयारूपादावाग्निदमनिदमा॥४६॥दुर्गा
दुर्गपरादेविदुष्टदैत्यविनासिनी॥दमप्रदादैत्यहरादव्यादानःप्रदायिनी॥४७॥दुर्गार्त्तिना
शिनीदुर्गादभितानंतवर्जिता॥दि[illegible]वरप्रियादानादैत्यदर्प्पविदारिणी॥४८॥दशनादश
सौंदर्यादानवेंद्रविनाशिनी॥दयाधराचदमनिदर्वयंत्रविलाशिनी॥४९॥धरणीधारणी
धात्रिधराधरधरप्रिया॥धर्मज्ञाधवलाधन्वीधनदाधनवर्द्धिनी॥धराधरासुतादेवी
सुधर्माधर्मचारिणी॥धीराधीराधीरतराधीरसिद्धिः[illegible]प्रदायिनी॥५०॥धन्वन्तरि
धरधराधेयाधातुस्वरूपिणी॥नारायणीनारसिंहिनित्यानंदानरोत्तमा॥५१॥नक्तानक्ते

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सह
५

वतिनित्यानीलजीमूतसन्निभा॥निलांजिनीनीलवस्त्रानीलपर्वतवासिनी॥५१॥सुमालापु
ष्परचितानीलांबुजसमप्रभा॥नित्याख्याषोडशीविद्यानित्यानित्यसुखावहा॥५२॥नर्म
दानंदवानंदासनंदानंदवर्द्धिनी॥यशोदानंदनयनानंदनानिंदवासिनी॥५३॥नागान्तानागिनीवृ
द्धानागपत्नीचनागिनी॥नमिताशेषजननिनमस्कारवतीनमः॥५४॥पीताम्बरापार्वतीच
पीतावरणभूषिता॥पीतमाम्बरधरापीतांगीपींजमूर्द्धजा॥५५॥पीतपुष्पार्चनर
तापीतपुष्पसमर्चिता॥परप्रभापितृयंतिपरसैन्यविनाशिनी॥५६॥परात्मापरतंत्रा
चपरमंत्रात्परात्परा॥पराविद्यापरासिद्धिपरस्थानप्रदायिनी॥पुष्पापुष्पवतिपुष्पा
पुष्पमालाविभूषिता॥पुरातनापूर्वपरापरसिद्धिःप्रदायिनी॥५७॥पीतानितंबी
नीपीतापीनोन्नतघनाघनि॥प्रेमाप्रमध्यमाशेषापद्मपत्रविलासिनी॥५८॥पद्मा

ल्यां५

रामः
५

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वतिपद्मनेत्रा पद्मापद्ममुखिपरा ॥ पद्मनाशापद्मप्रियापद्मरागस्वरूपिणी ॥ पावनापा
लिकापात्रापरदापरदाशिवा ॥ प्रेतसंस्थापरानन्दापरब्रह्मस्वरूपिणी ॥ जीवेश्वर
प्रियादेविपशुरक्तारतिप्रिया ॥ पशुमांसप्रियापर्णापरामृतपराधरा ॥ पाशिनी त४
पाशिकापातापासिनीपशुमर्दिनी ॥ ६० ॥ परानंदः परादेविपशुपाशविनाशि
६५ नी ॥ फुल्लारविंदवनाफुल्लोत्पलशरीरिणी ॥ ६३ ॥ फकाराफपकर्णाचफुल्ले
न्दिवरलोचना ॥ स्फुरामंत्रास्फाटिकीस्वाहास्फोटयत्स्वरूपिणी ॥ ६४ ॥ स्फु
टिकाग्रटिकाधीस्या [illegible] त्स्फाटिकादिस्वरूपिणी ॥ वरांगनावरधरावाराहि
वाशुलिवसम् ॥ ६५ ॥ विंदुस्थाविंदुनीवामाविंदुचक्रनिवासिनी ॥ विद्याध

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सह
६
२३

री विशालाक्षि काशीवासी जनप्रिया ॥६६॥ वेदविद्या विरूपाक्षी विश्वयुग्वहुरू
पिणी ॥ पंचशक्ति विष्णुशक्ति पंचयुक्ता शिवप्रिया ॥६७॥ वैकुंठवासिनी देवि वै
कुंठेश्वर [illegible] ह्लभा ॥ वैकुंठवासिनी देवि वैकुंठपददायिनी ॥६८॥ ब्रह्मरूपपरब्र
ह्मपरब्रह्ममहेश्वरी ॥ भवप्रिया भवोद्भावा भवदैत्यविनाशिनी ॥६९॥ भवपारा भवा
धारा भाग्यवत्प्रियकारिणी ॥ भद्रा शुभद्रा भवदा भवदर्प्पविनाशिनी ॥७०॥ भवानी
भैरविभिमा भद्रकाली शुभद्रिका ॥ भगिनी भगरूपा च भगमाला भगोत्तमा
॥७१॥ भगप्रिया भगवति भगवासा भगाकरा ॥ भगश्रेष्ठा भागवति भगरुद्रा भ

रामः
६

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गाशिनी ॥७२॥ भगलिंगप्रियादेवि भगलिंगपरायणि ॥ भगलिंगस्वरूपाच भगलिंगवि
नोदिनी ॥७३॥ भगलिंगरतादेवि भगलिंगविलासिनी ॥ भगमाला भगकला भ
गाकारा भगंवरा ॥७४॥ भगवेगा भगाभूषा भगेन्द्राभाग्यरूपिणी ॥ भगलिंगांग
संभोगा भगलिंगसमानहा ॥७५॥ भगलिंगसमादुर्गा भगलिंगनिषेविता ॥ भ
गंवत्सुवपुर्याच भगलिंगसुखान्विता ॥७६॥ भगलिंगविरक्ताच भगलिंगस
मावृता ॥ माधवि माधवा मान्या मधुरा मधुशालिनी ॥७७॥ मंदहासा माहामा
या मोहिनी महदुत्तमा ॥ महामोहा महामाया महाघोरा महास्मृतिः ॥७८॥ मनश्विनी
महारत्ना मोहिनी मधुरानना ॥ मेनिका मौनिनी माता मणिरत्नविभूषिणी

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सह

॥७९॥ मल्लिकामौलिकामालामालाधरमदोत्तमा॥ मत्तसिंहसमोल्लासा मत्तसिं
हामहासना॥८०॥ मदनासुंदरि मेधा मधुमत्ता मधुप्रिया॥ महेंद्रवल्लभा सि
नाशैलाच मिथुनात्मजा॥८१॥ महाकालि महा महामाली मनोबुद्धि महो
त्कटा॥ महेश्वरि महामाया महिषासुर मर्दिनी॥८२॥ मधुराक्किर्तिकाम
त्ता मत्तमातंगगामिनी॥ मदप्रिया मांसरता मत्तयुक्ता मकारिणी॥८३॥ मि
थुनावल्लभा देवि महानंदा महोत्सवा॥ मरिची र्मरिचिर्नामा मनोबुद्धि
प्रदायिनी॥८४॥ महामोक्षा महालक्ष्मि महधत्पुददायिनी॥ यमरु

राम:

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पाचयमुनाजयंतीचयशप्रदा॥ याम्यायाम्यवतीयुद्धायादोकुलविवर्द्धिनी॥ रमारामा
रामपत्निरत्नमालारतिप्रिया॥८६॥ रत्नसिंहासनस्थाचरत्नाभरणभूषिता॥ रम
णीरमनियाचरतीरशप्रदायिनी॥८७॥ रतानंदारतवतीरघूणांकुलवर्द्धिनी॥
रमणारंकिनीरैव्यारैढाएढिकरत्नजा॥८८॥ रंत्रीरसस्वरूपाचरात्रीरणसुखा
वहा॥ रितुजाऋद्धिदाऋद्धारितुरूपारितुप्रिया॥८९॥ रक्तप्रियारक्तरक्तार
दिनीरक्तदंतिका॥ लक्ष्मिलज्जाचलतिकालीलालोलालताक्षणा॥९०॥ ली
लायतिलोमहर्षाललाटपट्टिकास्थिता॥ ब्रह्मरूपाचब्रह्मज्ञावेदमाताचवैदिका
॥९१॥ ब्रह्मोद्भवाब्रह्मकलाब्रह्माणीब्रह्मवादिनी॥ वेदांगनावेदरूपावनि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तागनिताचशा ॥ ८२ ॥ बालाचयुवतिवृद्धाब्रह्मकर्मपरायणा ॥ विंध्यस्थाविंध्य
वामाचविंध्यरूपाविभूषिता ॥ ८३ ॥ विद्यावतिवेदधरिव्यापिकावारुणिक
ला ॥ वामाचारप्रियावह्निवामाधारपरायणा ॥ ८४ ॥ वामाचाररतादेविवामदेव
प्रियावमा ॥ बुद्धिन्द्रीयाविशुद्धाचबुद्धाचवनमालिनी ॥ ८५ ॥ बन्धमोचनकर्त्रि
चवारुणीवरुणालया ॥ शिवाशिवप्रियाशुद्धाश्रद्धांगिशुक्लवर्णिका ॥ ८६ ॥
शुक्लपुष्पप्रियाशुक्लाशिवध्यानपरायणा ॥ शुक्रस्थाशुक्रिणीशुक्राशुक्ररू
पाचशुक्रिका ॥ ८७ ॥ शुक्रमाल्यांबरधराशुक्लपक्षस्वरूपिणी ॥ षडमूर्तिषडंगा
चषड्चक्रविनीवासिनी ॥ ८८ ॥ षड्ग्रंथियुक्ताषोडाचषड्मंत्राचषडात्मिका ॥ षडं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गयुवतीदेवीषडंगप्रकृतिश्च सा॥८९॥षडाननाषडिसाचषष्टिषष्टेश्वरप्रिया॥षडृसं
वादाषोडसिचषोडान्यासस्वरूपिणी॥षोडशेश्वररूपाचषडृमुखीषडृभुजान्वि
ता॥षडृचक्रभेदनकरीषडृचक्रसस्वरूपिणी॥१॥सनकादिस्वरूपाचवि
ष्णुधर्मपरायणा॥सितासप्तेश्वरीसिद्धासुरमातासुरोत्तमा॥२॥सिद्धिविद्या
सिद्धिमातासिद्धिदासिद्धिरूपिणी॥हराहरिप्रियाहाराहरिणीहारयुक्त
था॥३॥हरिरूपाहरिधराहरिणाक्षीहतप्रिया॥हेतुप्रियाहेतुरताहि
ताभोहेतुरूपिणी॥४॥क्षमाक्षमावतीक्षान्तीक्षुद्रघंटविभूषणा॥क्षयंकरि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्षिती शाक्षी क्षीर मध्यसुशोभना ॥५॥ अजन्यता अवर्णा च अजेया शेषशायि
शह नी ॥ सन्तर्गता साधना च नन्तरानंतरूपिणी ॥६॥ अरूपा अमला आर्या अनन्त
८ गुणरूपिणी ॥ अविद्या विद्यका विद्या अरविंद विलोचना ॥७॥ अपराजि
ता चाजिता च अजेया अमरावती ॥ अल्पा अनल्पा आद्या च आदि सिद्धि प्रदायि
नी ॥८॥ आदिवीद्या आदि भूता आदि सीद्धि प्रदायिनी ॥ शीत्कार रूपिणी
शीमा सर्वासन विभूषिता ॥९॥ इन्द्र प्रिया इंद्रिया च इन्द्र पद्मनी वासिनी ॥ इन्द्रा
क्षी इन्द्र वज्रा च इन्द्र मुख्यौ क्षीणि तथा ॥१०॥ इलाका ग्रनिवासा च ईश्वरि श्वर रामः
८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वल्लभा॥जननी आसुरादीना अमेघाश्वरकर्मकृत॥११॥उमा कात्यायनी उ
र्द्धा मेना चोत्तरवासिनी॥उमापति प्रिया देवी शिवा चोङ्कारहृपिणी
॥१२॥उर्द्ध दन्तोत्तमांगा च उत्तरा चोर्द्ध केशिनी॥उमासिद्धि परा यात्रा उर
गासनशंस्थिता॥१३॥उरजेन्द्र शिरोरत्न उरगोरगवल्लभा॥उद्यानवा
सिनी बाला एनविद्याधरा तथा॥१४॥ऐंकारकलयोपेता ऐंकारपर
माकला॥ऐंवंदवदवाणी च ऐंकारक्षरमंडिता॥१५॥ऐंद्रिकुलिश
हस्ता च लोकः परमवासिनी॥ऐंकारविजमंत्रा च ॐ नमो रूपधाधा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शह
१०

रिणी ॥१६॥ परंब्रह्मस्वरूपाच अंशुकाशुकवल्लभा ॥ अंकारा अपदंताच प्रक्षा
क्षरविभूषिता ॥१७॥ अत्र मंत्रा मंत्ररूपा पदपाठ समन्विता ॥ प्रणवोंकाररू
पाच प्रणवोच्चार माक्रमः ॥१८॥ हिँकाररूपा हिँकारि वाग्बीजाक्षरभूषणा
॥ उर्ध्वरेखा सिद्धियोगा च हृत्पद्मासनसंस्थिता ॥१९॥ बीजाख्या नेत्रहृदया हिँ
बीजा भुवनेश्वरी ॥ क्लिँ कामराजा क्लीँ त्रा च चतुर्वर्गफलप्रदा ॥२०॥ क्लीँ क्लीँ
क्लीँ रूपिका देवी क्लीँ क्लीँ क्लीँ रूपधारिणी ॥ कमलाशक्तिबीजा च पाशांकुश
विभूषिता ॥२१ श्रीँ श्रीँ कारा महाविद्या श्रद्धा श्रद्धावती तथा ॥ ॐ ऐँ क्लीँ हिँ श्री

राम:
१०

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पराच ह्रीँकारि परमाकला ॥२१॥ क्रीँ श्रीँकारस्वरूपा च सर्वकर्मफलप्रदा ॥ सर्व
द्या सर्वदेवी च सर्वसिद्धिप्रदा तथा ॥२३॥ सर्वज्ञा सर्वसिद्धिश्च वाग्वि
भूतिः प्रदायिनी ॥ सर्वमोक्षप्रदा देवी सर्वभोगप्रदायिनी ॥२४॥ गु
रोश्चरणभक्ता सर्वज्ञानिप्रदायिनी ॥ सर्वज्ञेश्वरी देवी सर्व
सिद्धेश्वरी तथा ॥२५॥ सर्वप्रियंकरी चैव सर्वमङ्गलदायिनी
॥ सर्वानंदप्रिया देवी ब्रह्मानंदप्रदायिनी ॥२६॥ मनोवांछितदा दे
वी मनोदुःखविनाशिनी ॥ अकारादिक्षकारान्ता दुर्गादुर्गतिनाशिनी

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शाह
११

शिनी॥२७॥पद्महस्ता सुनेत्रा च स्वधा स्वाहा न षट्करा॥ कचवर्गा ठवर्गा च
पवर्गा च समन्विता॥२८॥अन्तस्था चोष्मरूपा च नवदुर्गा नरोत्तमा॥न
वसिद्धिप्रदा नीला तथा नीलपताकिनी॥२९॥नित्यरूपा निशिक
रिस्तंभिनी मोहिनी तथा॥वशीकरा तथोच्चाटि उन्मान्या कर्षि
णी तथा॥३०॥स्वल्पसिद्धिस्वल्पकला दिव्यवीरपशुक्रमात्॥सं
क्रांतिसर्वबीजा च सप्तवासरभूषिता॥३१॥प्रथमा च द्वितीया च तृतीया
च चतुर्थिका॥पंचमी चैव षष्ठी च विशुद्धा सप्तमी तथा॥३२॥अ

राम:
११

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ष्टमीनवमीचैवदशम्येकादशीतथा॥द्वादशीत्रयोदशीचैवचतुर्दशि
चपौर्णिमा॥३३॥अमावास्यातथापूर्वाउत्तरापरिपूर्णिता॥खड्गिनी
चक्रीणीघोरागदिनीशूलीनीतथा॥३४॥चापिनीबाणभूषिं
डीसर्वायुधविभूषणा॥कुलेश्वरीकुवतीकुलाचारपरायणा॥३५
॥कुलकर्मसुरक्ताचकुलाचारपरायणा॥कीर्त्तिश्रीह्रिरमारामा
धर्माधर्मस्वरूपिणी॥३६॥क्षमाधृतिस्मृतिर्मेधाकल्पवृक्ष
विलासिनी॥उग्राउग्रप्रभवतीवेदविद्याप्रबोधिनी॥६१॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

साध्या सिद्धा सुचिद्धा च रिपुरूपा तथैव च ॥ कालिकरालीकात्या च का
लदैत्यविनासिनी ॥ ३७ ॥ कौलिनी कालिनी चैव कफवर्गा रता त
था ॥ जयिनी च जया युक्ता जयदा जंभिणी तथा ॥ ३८ ॥ श्राविणी द्रा
विणी देवी मेरुंडा वह्निवासिनी ॥ ज्योतिरूपा च जयदा ज्वालामा
ला समाकुला ॥ ४० ॥ भिन्ना भिन्नप्रकाशा च विभवा भिन्नरूपि
णी ॥ अश्विनी भरणी चैव सुनेत्रा वपुसंभवा ॥ ४१ ॥ कद्रुश्च वि
नता रूपा च दितिश्चादितिखेचरा ॥ कीर्त्तिर्वामा प्रिया देवि कीर्त्या

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कीर्तिविवर्द्धिनी ॥४२॥ सद्योमांससमालुब्धा सद्यः छिन्नशिरःकरा ॥
दक्षिणा चोत्तरा पूर्वा पश्चिमादिस्वरूपिणी ॥४३॥ आग्नेयानै
ऋतीयाम्या वायव्यादिक्तथा स्मृता ॥ ऊर्द्ध्वगा घोरता ख्याता कृष्णा
रक्ता च पितका ॥४४॥ चतुर्युगा चतुर्वर्णा चतुर्धामा चतुःकृता ॥
चतुर्मुखा चतुर्वेदा चतुर्विद्या चतुर्मुखी ॥४५॥ चतुर्गुणा चतुर्मा
ला चतुर्वर्गफलप्रदा ॥ धात्री विधात्री मिथुना नारी नायकवा
सिनी ॥४६॥ सुरामुदा मुदवती मेदिनी मेनकात्मजा ॥ अर्द्धका

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सह/ लिसिद्धिकालिदक्षिणाकालिकाशिवा॥४७॥निलसरस्वतीतारा
१२ वगलाछिन्नमस्तका॥सर्वेश्वरिसिद्धिविद्यापरापरमदेवता॥४८
॥हींगुलांगीचहिंगुलीहिंगुलाधरवासिनी॥हिंगुलोत्तमवर्णाभा
हिंगुलाभरणप्रिया॥४९॥जगतिचजगन्माताजगदीश्वरवल्ल
भा॥जदार्द्दनप्रियादेविजयमुक्ताजयप्रदा॥५०॥जगदानंदकर्त्री
चजगदाह्लादकारिणी॥ज्ञानदानकरीदेविद्याजानकिजनकप्रि
या॥५१॥जपताजपतानित्याज्वलदग्निसमप्रभा॥विंवाधराच रामः
१३

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विंवोष्ठि कैलाशाचलवासिनी ॥५२॥ विभवा वैभवमता अग्निहोत्रफल
प्रदा ॥ मंत्ररूपा परा देवि तथैव गुरुरूपिणी ॥५३॥ गया गंगा गोम
ती च प्रभाषा पुष्कराणि च ॥ विंध्याचलरता देवी विंध्याचलनिवा
सिनी ॥५४॥ वसुवाहु सुंदरी च कंसासुरविनासिनी ॥ शूलिनी शू
लहस्ता च वज्रा वज्रधरा तथा ॥५५॥ दुर्गा शीवा शांतिकरी ब्रह्माणि
ब्राह्मणप्रिया ॥ सर्वलोकप्रणेत्री च सर्वरोगहरा शुभा ॥५६॥ मंगला
शोभिता शुद्धा निष्कला परमा कला ॥ विश्वेश्वरी विश्वमाता

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सह
१४

विश्वानांललितातथा॥५७॥सदाशिवाउमादेविचण्डिकाचण्डविक्र
मा॥सर्वदेवमयिदेविसर्वागमभयापहा॥५८॥ब्रह्मेशविष्णुन
मितासर्वकल्याणकारिणी॥योगिनीयोगमाताचयोगिन्द्रहृ
दयस्थिता॥५९॥योगवतीयोगजाचयोगिन्द्रानन्दयोगिनी॥इन्द्राद्यैर्न
मितादेवीईश्वरीचेश्वरप्रिया॥६०॥विशुद्धिदाभयहराभक्तद्वेषभयंक
री॥भववेषाभाविनीचभेरुंडाभवकारिणी॥६१॥पंचभूतासर्व
भूताविभूतिर्भूतिधारिणी॥सिंहवाहाद्यमोहाचमोहपास

राम:
१४

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विनाशिनी ॥६२॥ मेदिरा मदिरा मुद्रा मुद्गरवहुरूपिणी ॥ सावित्री च महादेवी
परप्रियविनायका ॥६४॥ यमदूती च पिंगाक्षि वैष्णवी शांङ्गधारिणी
॥ चण्डप्रियानंदना च चंदनारण्यवासिनी ॥ चंदनेन्दुसमायुक्ता चं
डदैत्यविनाशिनी ॥६६॥ सर्वेश्वरी यक्षणी च कीरातीराक्षशी तथा
॥ महापापहरा देवी महाभयहरा तथा ॥६७॥ महाभोगकरी देवी म
हामोक्षप्रदायिनी ॥ वीश्वहंत्री विश्वरूपा विश्वसंहारकारिणी
॥६८॥ धात्री च सर्वलोकानां देवानां हितकारिणी ॥ कामिनी

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal.

CC-0. Digitized by eGangotri and MIDF- Delhi

चकलासुक्ष्मादेवीवंध्यामहाबला ॥६९॥ सुरेंद्रपूजीतावध्यामहातेजोव
तीतिच ॥ परारूपपरादेवी त्रैलोक्याकर्षकारिणी ॥७०॥ इतीतेकथि
तंदेवीकथितंनामसहस्रकम् ॥ पठेद्वापाठयेद्वापीसर्वसिद्धिभ
वेत्प्रीये ॥७१॥ इतिभोकथितंप्रोक्तं महास्तंभकरंपरं ॥ प्रातःकाले
चमध्याह्नेसंध्याकालेचपार्वती ॥७२॥ एकचित्तंपठेदेतत्सर्वसि
द्धिर्भविष्यती ॥ एकवारंपठेद्यस्तु सर्वपापक्षयोभवेत् ॥७३॥ युग्म
वारंपठेद्यस्तुगणेशस्यदृशोभवेत् ॥ त्रिवारपठनादेवीसर्वसिद्धिं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तिनान्यथा ॥ ७३ ॥ स्तवस्यास्य प्रभावेण मोक्षो भवति सुव्रते ॥ मोक्षार्थिल
भते मोक्षं धनार्थिलभते धनं ॥ ७४ ॥ विद्यार्थिलभते विद्यां तर्कव्या
करणाचितां ॥ महिपतिर्वत्सरास्याद्धनुहानी प्रजायते ॥ ७५ ॥ क्षो
णिपतिर्वसस्तस्य स्मरेण सदृशो भवेत् ॥ यः पठेत्सर्वदा भक्त्या
श्रीयुक्तो भवति प्रिये ॥ ७६ ॥ गणाध्यक्षप्रतिनिधिकविकाव्य
स्य पारगः ॥ गोपनीयं प्रयत्नेन जननी जारवत्सला ॥ ७७ ॥ हेतुयु
क्तो भवेन्नित्यं शक्तियुक्तो भवेत्सदा ॥ य ईदं पठते नित्यं शिवे

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नशदृशी भवेत् ॥ ७८ ॥ जीवन्धमार्थभोगी स्यात्मृतो मोक्षवती भवेत् ॥
सत्यं सत्यं पुनः सत्यं सत्यं वाक्यं महेश्वरी ॥ ७९ ॥ स्तवस्यास्य प्रभावेण देवेन स
ह मोदते ॥ स्तंभिताश्चासुरा सर्वे स्तवराजस्य कीर्तनात् ॥ ८० ॥ आपद्विध्वं
सिनी देवी मनोवांछितमृद्धती ॥ तस्मात्सर्वप्रयत्नेन पठनीयं परात्प
रं ॥ ८१ ॥ इति श्री उत्कशावर महानागेन्द्रप्रयाणतंत्रे षोडशशाहस्रे वि
ष्णुशंकरसंवादे पितांबराया आपदुद्धारसहस्रनामस्तोत्रं समाप्तं
॥ सपूर्णम् ॥ शुभम् ॥ रामः ॥ रामः ॥ श्री कृष्णार्पणमस्तु ॥ रामः ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीगणेशायनमः॥ ॐनमःश्रीवगलादेव्यै॥अथवगलाहृदयम्॥१॥बालभा
नुप्रतिकाशांत्रीलनीलोत्पलमालिनाम्॥नंदेहंनगलादेवीस्तंभना
स्त्रस्वरूपिणी॥१॥ईश्वरउवाच॥विश्वनाथनमस्तेस्तुनि
रुपाक्षनमोनमः॥शुभमंस्तंभविधेंयाप्रयोगंवंनशंकरः॥२॥ई
श्वरउवाच॥वगलाहृदयंमंत्रंगुह्यागुह्यतरंमहत्॥यस्यास्मरण
मात्रेणमंत्रसिद्धिर्भवाप्रुयात्॥३॥नध्यानंनचहोमंश्चनजपंन
चतर्पणम्॥सकृदुच्चारणंमंत्रंचिंतितंभवतिध्रुवम्॥४॥न

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वह
१७

चाभिषेकं न च मंत्रदिक्षा न चैव दिक्पाल क्रतुस्वदेवता ॥ न चा
पि पंचेंद्रियनिग्रहं च सकृद्भजेहं बगलाख्यहृन्मनुम् ॥ ५ ॥ बग
लाहृदयं मंत्रं ब्रह्मादिनां सुदुर्लभम् ॥ सकृत्स्मरणमात्रेण वांछि
तं लभते फलम् ॥ ६ ॥ संचारवांदरिद्रोपि लब्धो भवति पंडितः ॥
चतुरो मुखरश्चैव कीर्त्तिमान्नंदिकेश्वरः ॥ ७ ॥ मौनी नाजपि होम
स्तु नैष्ठिको भ्रष्टतां व्रजेत् ॥ एतद्विना कलौ पुत्र सुकृतं किर्त्तिका
रणम् ॥ ८ ॥ गुणश्च वर्त्तते पुंसां तस्य नासस्य कारणम् ॥ बगला

राम:
१७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सकृदावर्त्य यत्नतः १

हृदयं मंत्रं [redacted] ॥१०॥ तस्योल्लंघनमात्रेण नष्टस्यात्प्र
मंत्रं जपोपि वा ॥ वगला हृदयं मुपासनपरस्य च ॥१०॥ करोती येन सं
२ तोषं तस्य सिद्धिर्भवेद्ध्रुवं मम ॥ येन केनाप्युपायेन हृन्मंत्रं येन
जप्यते ॥११॥ संतोषं जनयेत्तस्य चिन्तितं फलमाप्नुयात् ॥ तन्म
त्रोद्धारमतुलं तत्वं तत्वविधानतः ॥१२॥ वक्षेहं तव सर्वत्र क्रौंच
भेदन तद्वृणु ॥ पाशबीजसमुच्चार्य तद्धमायां ततोच्चरेत् ॥१३॥ अं
कुशं बीजमुच्चार्य भूवाराहं ततोच्चरेत् ॥ वाराहं वाग्भवं चैव का

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मराजमतः परम् ॥१४॥ श्रीबीजं भुवनेशी च बगलामुखी पदं वदेत् ॥
आवेशये च तत्पाशं ततो बीजं शमुच्चरेत् ॥ स्तब्धमायां ततो चार्य्य
अंकुशं बीजमुच्चरेत् ॥ अंकुशं च ततोच्चार्य्य मम शब्दं पुनर्वदेत् ॥
१६॥ ममैव हृदये पुक्ता चिरं तिष्ठ द्वयं तथा ॥ पुनर्बीजं त्रयं चोत्का
हुं फट् स्वाहा समन्विता ॥१८॥ हृदयेती समुच्चार्य आवाहय युगं वदेत्
॥ सान्निध्यं कुरु युग्मं च पुनर्बीजं त्रयं वदेत् ॥१७॥ अशीतीवर्णसं
पुक्ता बगला हृदयं मनुम् ॥ वंध्या पुत्रवती शीघ्रं बगला हृदयेन च ॥१७॥ वं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥ शत ॥४॥

विष्णुःप्रपूजिता ॥ विशालनयना विष्टि विनीता विनतावला ॥७॥ वलारा
तिसमाराध्यावलवर्णाविधायिनी ॥ वह्निरूपावह्निजायावह्निमण्डल
वासिनी ॥८॥ विक्रान्ता विश्वनिलया विद्याविद्यावतारिणी ॥ विचि
त्रवसनावेद्यावेद्याक्षरविकासिनी ॥९॥ वरदावरदावंद्यावंधनध्वं
सकारीणी ॥ विशिष्टाविश्वजननी विचित्रवित्तदायिनी ॥१०॥ विमा
नना विधिज्ञाववीरमार्गप्रचारिणी ॥ विरसूर्विरवंद्याव विमानव
रचारिणी ॥११॥ विद्याराज्ञि वेदमातावेदमार्गावतारिणी ॥ विंध्य ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पास्मर्यते सदा ॥ एतन्मे निश्चयं नास्ति परं कौतूहलं विभो ॥ २ ॥ ईश्वर उवाच ॥
वगलाष्टोत्तर शतं नामं परमदुर्लभं ॥ वकाद्यक्षरीं विद्यां सर्वसिद्धि
प्रदायिनीम् ॥ ३ ॥ यस्यास्मरणमात्रेण पवनोपि स्थिरायते ॥ तस्या
हं स्मरणं देवी करोम्यनुदिनं निशी ॥ ४ ॥ ब्रह्मविद्याति गुह्यायाश
तमष्टोत्तरं शुभम् ॥ अवाच्यमपि वक्ष्यामि त्वत्स्नेहात्रगनादिनी ॥
५ ॥ ह्रिँ वाला वगला विद्या विमला ब्रह्मरूपिणी ॥ विश्वेश्वरी विश्व
माता विश्वातिता विलासिनी ॥ ६ ॥ ब्रह्मविद्या विचित्राङ्गि विधी

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शत
॥६॥

तप्रेतादिये भये ॥ पठनादेव सर्वेभ्यो भयेभ्यो मुच्यते नरः ॥२९॥ स्त
वराजमिदं भद्रे न देयं यस्य कस्यचित् ॥ दद्यान्नैव वरारोहे देवि
क्रुद्धा भवेद्धुमम् ॥३०॥ एतत्स्मरणमात्रेण सर्वे सिध्यंति भूत
ले ॥ षट्कर्मसिद्धिदं स्तोत्रं नात्र कार्य्या विचारणा ॥३॥ इति श्रीरु
द्रयामलतंत्रे उमामहेश्वरसंवादे वकारादि श्रीवगलामुखीदे
व्याष्टोत्तरशतनामस्तोत्रं समाप्तम् ॥ सम्पूर्णं ॥ शुभम् ॥ शुभम
स्तु सर्वदा ॥ ईदं पुस्तकं लीखितं दयानिधी सर्म्मणः ॥ रामः ॥ रामः

॥६॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ध्यायोश्चैव रात्रौ वा यः पठेन्नरः ॥ अष्टम्यां वा चतुर्दश्यां नवम्यां वा विशेषतः ॥
२३ ॥ पूजा विधाय विधिना पठनीयं प्रयत्नतः ॥ एकवारं पठेद्यस्तु तस्य
स्यात्पातकक्षयः ॥ २४ ॥ द्विवारपठनाद्देवी संतुष्टा भवति ध्रुवम् ॥ त्रिवा
रपठनाद्देवी कार्य्यां सिध्यंती निश्चितम् ॥ २५ ॥ यावत्जीवं पठेद्यस्तु
मम तुल्यो भवेन्नरः ॥ अज्ञात्वा स्तवराजोयं मंत्रं जपति सर्वदा ॥ २६ ॥ न
सिद्धिमाप्नोति सर्वैः सत्यमेतन्मयोदितम् ॥ तस्मात्सर्वप्रयत्नेन प
ठनीयं निरंतरम् ॥ २७ ॥ स्तवस्यास्य प्रभावेण त्रैलोक्यविजयी भवे
त् ॥ वने रणे वह्निभये परचक्रभये तथा ॥ २८ ॥ राजभये दैवभये भू

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इति ॥५॥

प्रियावहु ॥१७॥ विरिंचीविनतावृन्दविंदुमालावरानना ॥ बलाकाबलवि
ज्ञाचवरिष्ठाविश्वपालिनी ॥१८॥ वशिष्ठिवारुणिचंद्रावरुणावरु
णप्रिया ॥ वरणावरणाकारावनस्थावनदाविदुः ॥१९॥ विमोहिनीविं
वराचवदान्यावंदनप्रिया ॥ बलिधारावलिनुतावलिपुष्पावलिव्र
ता ॥२०॥ वामार्चनमताव्राह्मिविद्याविद्यातरुष्टिता ॥ वेणुविद्याव्रत
धराब्रह्मानंदविमोदिनी ॥२१॥ इत्येतत्कथितंदिव्यंनाम्नामष्टोत्त
रंशतम् ॥ अनेनस्तुवतोदेवीप्रीतिर्भवतिसर्वदा ॥२२॥ पूजायांसं

एमः ॥५॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्था विंध्यनिलया बिंदुरूपा विदारिणी ॥१२॥ विषेस विष्णु विद्या च विज्ञा
ना विंवधारिणी ॥ विंवोष्ठि वंधु जिवा च वंधुरा वंधुहारिणी ॥१३॥ विशिला वी
रपद दा विश्वंभर विनोदिनी ॥ विश्वंभरा वीरदात्री ब्रह्मस्त्रा ब्रह्मवंदि
ता ॥१४॥ विद्याधरी विशालाक्षि विमला व्रजलोचना ॥ वरदा वल
भद्रा च विद्यानंदा विधिस्तुता ॥१५॥ विमोहिनी वलाराध्या वीणा
वादनतत्परा ॥ विविधाता विधात्री च विशिखा विमला ॥१६॥ वाग्देवला
वी वालिका वर्णा वल्लीनन्या वरानना ॥ वलदेवी च वलिनी वलिदान

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

This PDF you are browsing is in a series of several scanned documents containing the personal colleciton of Jagannath Bhattarai ji from Kathmandu, Nepal.

CV:

Jagannath Bhattarai
Date of Birth: 31 December 1960
Place of Birth: Kathmandu, Nepal
Address: Nagarjun (Ramkot), Kathmandu

Educational Qualifications
Bachelor of Science (B.Sc.) – Major in Biology
Master's Degree – Sociology & Anthropology
Shastri (Ongoing) – Balmiki Vidyapeeth

Professional Experience
Government School Teacher (Madhyamik Pratham Shreni)
Taught at Secondary Level (Madhyamik)
Taught at Higher Secondary Level (Uchcha Madhyamik)
Served as Head Teacher
Led academic and administrative development
Strengthened institutional performance and student outcomes

Areas of Interest
Sanskrit Vyakaran
Spiritual & Philosophical Studies
Educational Leadership

Digitization by eGangotri Trust
Funding by MIDF, New Delhi